IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# पूर्वमीमांसायां वेदस्य नित्यत्वापौरुषेयत्वनिरूपणम्

**Name** – Abhijit Nandi
**Dept.**- Mimamsa
**Institution**- NSU, Tirupati, A.P.

वेदानां पौरुषेयत्वापौरुषेयत्वे नैयायिकाः वेदानां पौरुषेयत्वं स्वीकुर्वन्ति। अर्थाद्वेदाः पुरुषनिर्मिताः सन्ति, एतेषां नैयायिकानां मते वेदाः पौरुषेया ईश्वरकृताश्च। सृष्ट्यारम्भे ईश्वरः करुणावशाज्जीवानां कल्याणाय वेदानां ज्ञानं ददाति। अन्यच्च मतं मीमांसकानां वर्तते, ये वेदानामपौरुषेयत्वं स्वीकुर्वन्त्यथद्वेदाः पुरुषनिर्मिता न, अपित्वेते नित्यानाद्यनन्तास्सन्ति। एतेषां कोऽपि रचयिता नास्ति। आचार्यसायणोऽपि वेदस्यापौरुषेयत्वं स्वीकरोति, परन्तु तन्मतेऽस्याभिप्रायो वेदाः सामान्यपुरुषनिर्मिता न, अपितु विशिष्टपुरुषनिर्मिताः सन्ति, ईश्वरकृताञ्च सन्ति, परन्तु मीमांसका वेदा ईश्वरकृताः सन्ति, इदमपि न स्वीकरोति, तेषां मते न कोऽपि वेदानां कर्ता विद्यते। ते नित्याः अनन्ता अर्थादपौरुषेयाश्च सन्ति।

प्रथमाध्यायस्य प्रथमपादस्यान्ते महर्षिजैमिनिना वेदापौरुषेयत्वविमर्शः कृतः। तत्रादौ द्वाभ्यां सूत्राभ्यां पूर्वपक्षः (वेदपौरुषेयत्वम्) संस्थाप्य तदनु चतुर्भिः सूत्रैर्वेदपौरुषेयत्वं खण्डयित्वा महर्षिजैमिनिना वेदापौरुषेयत्वं प्रतिपादितम्। तेषामेव सूत्राणां शाबरभाष्यस्य विशिष्टसन्दर्भे मीमांसायां वेदापौरुषेयत्वविमर्शः कृतः। 'दृशिर् प्रेक्षणे इति धातोः करणार्थे ल्युट्प्रत्यये कृते सति दर्शनशब्दो निष्पद्यते। यस्यार्थो भवति "दृश्यतेऽनेनेति दर्शनम्। वस्तुनः सत्यभूततात्त्विकस्वरूपं येन
दृश्यते तद्दर्शनम्। कोऽहम्?, कुत आयातः?, अस्य दृश्यमानजगतः किं स्वरूपम्?, अस्योत्पत्तिः कुतः?, अस्याः सृष्टेः कारणं किम्?, इदं चेतनमचेतनं वा?, अस्मिन् संसारेऽस्माभिः कानि कार्याणि कर्तव्यानि?, जीवनं सुचारुरूपेण यापनाय कीदृशः सुन्दरतमो मार्गः? इत्यादिप्रश्नानां समुचितोत्तरप्रदानं दर्शनस्य प्रधानं लक्ष्यमस्ति। दर्शनेऽस्मिन् मुख्यरूपेण तत्त्वस्य स्वरूपं, ज्ञानं, ज्ञानस्य साधनं, ज्ञानस्य प्रामाणिकता चेत्यादयस्तथा चाचारस्य विभिन्नविन्दवो यथा- कर्म, कर्मफलं, कर्मस्वातन्त्र्यादीनामध्ययनं क्रियते।

**पूर्वपक्षः**–

महर्षिजैमिनिना द्वाभ्यां सूत्राभ्यां वेदपौरुषेयवादिनां मतं प्रस्तुतम्, तत्रादौ प्रथमं सूत्रम्, यस्मिन् विवेचितं यत् पुरुषाणां नामसु वेदनामान्यभिहितानि भवन्ति। यथा– 'कठ' इति नाम्ना काठकशाखा, 'पिप्पलाद' इति नाम्नाऽथर्ववेदस्य पैप्पलादशाखा। अतो वेदाः पौरुषेया इति केचन वदन्ति "वेदांश्चैके सशिकर्यं पुरुवाख्या"। शाबरभाष्येऽस्य सूत्रस्य व्याख्यायां शबरस्वामिना पूर्वपक्षमुद्धृत्य तस्य विवेचनमपि प्रस्तुतम्– पूर्वपक्षिणो वदन्ति यद्भवद्भिरस्माकं सर्वेषामाक्षेपाणां समाधानं विहितम्, परन्त्वियं तु चोदना पौरुषेयाऽस्ति, यतोहि वेदनिर्माणं तु किञ्चित् कालपूर्वमेवाभूत्, तथा च चोदनानां (क्रियाप्रवर्त्तकवेदवाक्यानां) समूहो वेदः, यदि वेदः पौरुषेयश्चेदत्र संशयो नास्ति एवं चोदनाऽपि पौरुषेया वर्तते। एवं प्रकारेण पूर्वपक्षीदं साधयति, चोदना पौरुषेयाऽस्ति चेत् साऽनित्याऽस्ति, एवं प्रकारेण पौरुषेया चोदना धर्मसदृशपदार्थं लक्षितुं न समर्था भविष्यति। पूर्वपक्षिणो वदन्ति यत् वेदा अतः कृतकाः, यतोहि ते पुरुषाणां नामस्वभिहिता भवन्ति। यथा काठकम्(कठ इति पुरुषनाम्ना यजुर्वेदस्य काठक इति शाखा प्रसिद्धा), कालापकम्(कलापक इति पुरुषनाम्ना कालापकशाखा) पैप्पलादम् (पिप्पलादपुरुषनाम्ना अथर्ववेदस्य पैप्पलाद इति शाखा।) अन्यच्च पुरुषाणां वेदशास्त्रेण सह सम्बन्धं विना पुरुषनाम्ना वेदनामान्यभिहितानि न भवितुमर्हति, यतोहि पुरुषं विना न कश्चिदस्ति येन शब्दस्य सम्बन्धः स्यादतः कर्त्ता पुरुषः, कार्यं शब्दोऽस्ति।

पूर्वपक्षी पुनः कथयति यद्भवन्तो यदि कथयिष्यन्ति यद् एते कठ-कलापकेत्यादिपुरुषाः वेदरचयितारो न, अपितु तेषां प्रवचनकाराः सन्ति, तर्हि वयं ब्रूमो विशेषणं त्वसाधारणं भवति। अत एकस्याः शाखायाः कृते एकस्मिन्नेवासाधारणविशेषणरूपे एक एव कर्त्ता भवितुमर्हति, प्रवचनकारास्तु बहवो भवितुमर्हन्ति।

ये काठकः, कालापकः, पैप्पलादश्चेत्याद्यसाधारणविशेषणानि कर्तुर्द्योतकानि। अन्ते पूर्वपक्षीदं साधितुं प्रयतते यद्वेदानां कर्तुः स्मरणादपि तेषां कर्त्ता स्याद्, तस्मान्न प्रमाणं चोदनालक्षणोऽर्थो धर्म इति। शास्त्रदीपिकायामपि पार्थसारथिमिश्रेण पूर्वपक्षमुद्धृत्य वेदपौरुषेयत्वसाधने पूर्वपक्षिणाम् अनुमानप्रमाणं प्रस्तुतम्–

वेदानां पौरुषेयत्वं वाक्यत्वाद् भारतादिवत्।
काठकादिसमाख्याऽपि कृतकत्वे समर्थ्यते॥[1]

पुनश्चोक्तं यद्वेदानां पौरुषेयत्वस्वीकारे तेषां धर्मविषये प्रामाण्यं न भवितुमर्हति "पौरुषेयत्वे तु सञ्जातस्यापि वाक्यार्थप्रत्ययस्य स्वतः प्राप्तमपि प्रामाण्यं पौरुषेयस्येदृशेऽर्थमूलप्रमाणासम्भवात् विप्रलम्भभ्रान्त्यादिमूलतयाऽपोद्यते।

महर्षि जैमिनिनाऽग्रिमसूत्रेण पुनः वेदपौरुषेयत्ववादिनां मतं प्रस्तुतम् "अनित्यदर्शनाञ्च"। वेदेष्वनित्यपदार्थानामुल्लेखः प्राप्यते। अतो वेदाः पौरुषेयाः सन्ति। अस्य सूत्रस्य व्याख्यायां शबरस्वामिनोच्यते यद् पूर्वपक्षिणो वदन्ति यदनित्यपदार्थानामुल्लेखं दृष्ट्वापि वेदानां पौरुषेयत्वं सूच्यते। यथा– "बबरः प्रावाहणिरकामयत प्रवाहणस्यापत्यं प्रावाहणिः तेन प्रावाहणिना बबरेणेच्छा कृता। "कुसुरुविन्द

[1] शास्त्रदीपिका, वेदापौरुषेयताधिकरणम्

औद्दालकिरकामयत"। "उद्दालकस्यापत्यमौद्दालकिः", तेन औद्दालकिना कुसुरुविन्देनेच्छा कृता, एवं प्रकारेणानेकविधवाक्यानि प्राप्यन्ते, येष्वनित्यपदार्थानामुल्लेखः प्राप्यते। यदि वेदेष्वेवं स्याच्चेद् औद्दालकिजन्मनो नायं वेदग्रन्थो भूतपूर्वः। एवं प्रकारेणापि वेदानामनित्यत्वं वक्तुं शक्यते। तस्माद्वेदाः पौरुषेयाः सन्तीति पूर्वपक्षः।

शतपथब्राह्मणेऽपि वेदानां पौरुषेयत्वं सूचितम्, तत्र अग्नेः ऋग्वेदोऽजायत, वायोर्यजुर्वेदः, सूर्यात्सामवेदश्च "तेभ्यस्तप्तेभ्यस्त्रयो वेदा अजायन्तामग्नेः ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः" इति। एवमेव मनुस्मृतावप्युल्लिखितम्-

अग्निवायुरविभ्यस्तु त्रयं ब्रह्मसनातनम्।
दुदोह यज्ञसिद्ध्यर्थम् ऋग्यजुः सामलक्षणम्"॥

किञ्च "अध्यापयामास पितृन् शिशुराङ्गिरसः कविः"॥ इति।

भाट्टदीपिकायामस्य सूत्रस्य व्याख्यायां खण्डदेवेन शतब्राह्मणस्यांशमुद्धृत्य वेदाः पौरुषेयाः सन्तीति पूर्वपक्षः प्रस्तुतः- "तेभ्यस्तप्तेभ्यस्त्रयो वेदा अजायन्त" इति वेदानामनित्यत्वदर्शनादपि कृतको बेदः। एवं प्रकारेण महर्षिजैमिनिना तथा च मीमांसासूत्राणां व्याख्याकारैर्वेदाः पौरुषेयाः सन्तीति पूर्वपक्षः प्रस्तुतः।

**<u>वेदस्य नित्यत्वापौरुषेयत्वनिर्णये च सिद्धान्तपक्षः-</u>**

अत्र मीमांसकानामाशयः- मीमांसका हि कूटस्थनित्यवर्णानां राशिं वेदम् अपौरुषेयं नित्यमिति वदन्ति। तेषामाशयः- अलौकिकः अपूर्वात्मा च वेदार्थः न कथञ्चिदपि पुरुषैः बुद्धौ आरोपयितुं पार्यते। बुद्धावनारोपयन्तश्च वाक्यानि न विरचयेयुः। काठक कालापकादि समाख्यास्तु प्रवचनातिशयेनाप्युपपद्यन्ते। स्मर्यते च वैशम्पायनः सर्वशाखाध्यायी कठो हि केवलामिमां शाखां अध्यापयाम्बभूव। ततश्च बहुशाखाध्यायिनां सन्निधौ एकशाखाध्यायी अन्यामनधीयानः तस्यां प्रकृष्टत्वात् असाधारणं विशेषणमुपपद्यते। न चानेकपुरुषसाधारणं हि प्रवचनम्, कथं काठकत्वेनैव समाख्यायेत्, कर्तृत्वे पुनः कर्तुः कर्तृत्वात् सा समाख्या युज्यत इति वाच्यम्। अतिशययोगेन असाधारण्यं काठकस्यैवोपयुज्यते। यो हि परम्पराया अविच्छेदेन अध्यापनप्रसितो बभूवेति। यच्च प्रावाहणिरिति जननमरणवतां निर्देश इत्युक्तम्। तत्र प्रवाहणाख्यस्य पुरुषस्याप्रसिद्धत्वात् न प्रवाहणाख्यस्य पुरुषस्याप्रसिद्धत्वात् न प्रवाहणस्यापत्यं प्रावाहणिरित्यर्थः। परन्तु प्र+वह्+इ इति व्युत्पत्या यः प्रवाहयति स प्रावाहणिः। बबर इति अनुकृतिशब्दः। ततश्च नित्यनर्थं वायुमेव एतौ शब्दौ निर्दिशतः। यच्चोक्तं वनस्पतयः सत्रमासतेत्यादि उन्मत्तबालवचनतुल्यमिति। तस्यायं भावः-वनस्पतय अचेतना अपि सत्रमासत इत्युक्ते किं पुनर्विद्वांसो ब्राह्मणा इति स्तुतिपराण्येव तानि वाक्यानि। नैतैः अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिवाक्यानां काप्यनुपपत्तिः। ततश्च अध्ययनाध्यापनसंप्रदायप्रवर्तकत्वेन समाख्या उपपद्यत इति स्वीकर्तव्यम्। सर्गावसाने कालिदासादिविरचितग्रन्थेषु कर्तार उपलभ्यन्ते। वेदस्यापि पौरुषेयत्वे तत्कर्ता उपलभ्यते। न तथोपलभ्यते। ततश्च वेद अपौरुषेय इति निश्चयः। किञ्च यदुक्तम्- विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात् भारतादिवाक्यवत् इतितदनुमानं वेदः प्रागभावप्रतियोगितावच्छेदकधर्माभाववान् अस्मर्यमाणकर्तृकत्वात् आत्मादिवत् इत्यनुमानेन सत्प्रतिपक्षितम्। वाक्यत्वहेतुश्च जन्यज्ञानमूलकत्वेन सोपाधिक इति अप्रयोजकः। कर्तुरनादरात् विस्मरणामिति च न समीचीना युक्तिः। अक्षरशो विस्मरणाभावाय पदक्रमादिपाठं निर्णीतवातं वेदाधीनस्मृत्यादिकर्तृणां सर्वज्ञानां ऋषीणां वेदकर्त्रनादरोक्तिः अतिसाहसपूर्णैवेति विस्मरणं सुतरामसम्भवि। पूर्वकालो न वेदशून्यः कालत्वात् वर्तमानकालवत्, प्राक्कालिकं वेदाध्ययनं गुर्वध्ययनपूर्वकं अध्ययनत्वात् अद्यतनाध्ययनवत् वेदाः न पौरुषेयाः

सम्प्रदायाविच्छेदे सति अस्मर्यमाणकर्तुकत्वादित्यादिभिरनुमानैः पौरुषेयत्वं समूलमुन्मूलितं भवति। अस्मर्यमाणकर्तृककूपादौ व्यभिचार इति च न वाच्यम्। तत्रापि सामान्येन कर्तृस्मरणात् आदराभाववत्वदर्शनाच्च। वेदे पुनःसर्वजनसमाद्रियमाणत्वेऽपि कर्तुरस्मरणं पौरुषेयत्वाभावमेव स्पष्टं स्फोरयति। यदि वेदानां कर्ता कश्चिदभविष्यत् ततो अध्येतृपरम्परया अवश्यं व्यासबुद्धकालिदासादिवत् अस्मरिष्यत। नैवास्य जातु विस्मरणं संभवति। यागादेः फलसाधनतायाः प्रमाणान्तरागोचरत्वात् कर्तरि विश्रम्भादेव सर्वे वेदार्थानुष्ठाने प्रवर्तेरन्। तत्कथं कर्ता विस्मर्यत। अवश्यं हि स्मर्तव्यो न च स्मर्यते स्मर्तव्यत्वे सति, अस्मर्यमाणः कर्ता शशविषाणवत् आत्मनोऽभावमेव अध्यवसायेत्। येऽपि साटोपं पौरुषेयतां समर्थयन्ति तेऽपि नैवपरम्परा तत्र कर्तुविशेषस्मरणमभिधातुं प्रभवन्ति सामान्यतो दृष्टेन कर्तारमनुमाय स्वामिमतं यं कञ्चन तत्र निक्षिपन्ति। केचिदीश्वरम्। अन्ये हिरण्यगर्भम्, अपरे प्रजापतिम्, इतरे त्वनेकान्। न चेयं विप्रतिपत्तिः बहुरूपा परम्परा वेदकर्तरि मन्वादिवत् स्मर्यमाणे कथञ्चित् कल्पते। न हि मानवे, भारते, शाक्यग्रन्थे वा कर्तृविशेषं प्रति विवदते। तस्मात् स्मर्तव्यत्वे सति अस्मरणात् कर्तृरभाव एवाध्यवसातुं योग्यः। यदुक्तम् अग्नेर्ऋग्वेद इति तदपि न साधु। ब्रह्म स्वयंभु, वाचा विरूपनित्यया इति श्रुतिविरोधात् अग्नेर्ऋग्वेद इत्यादिश्रुतीनां अग्निना ऋग्वेद इत्यर्थपरत्वमेव युक्तम्, "अनादिनिधिना नित्या वागुत्सृष्टा स्वयंभुवा। स्वयंभूरेष भगवान् वेदो गीतः स्वयम्भुवा। शिरविद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः।।" इति प्रसिद्धिः। किञ्च किमिदं पौरुषेयत्वम्, इति विचारः कर्तव्यः। किं पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वम्? तदाह मानान्तरेणार्थमुपलभ्य रचितत्वं पौरुषेयत्वम्। न प्रथमः इष्टत्वात्। आकाशवत् नित्यानां सर्वगतानां कालतो देशतश्च क्रमशून्यानां अनित्यक्रमोच्चारणविशिष्टानां पूर्वपूर्वक्रमानुस्मरणनिमित्ततत्सदृशोत्तरोत्तरक्रमवतां वेदश्ब्दवाच्यानां पुरूषाधीनोत्पत्तिकत्वस्य मीमांसादर्शनस्यापि सम्प्रतिपत्तेः। न द्वितीयः, कालिदासादिकृतरघुवंशादिसाधारण्यापत्या लोकोत्तरत्वाभावेन सर्वजनसमादरणीयत्वानुपपत्तेः। किञ्च कोऽयं पुरुष इति विकल्पः, येन कृत इति विचारः कर्तव्यः। किं कश्चिन्मनुष्यः, उत योगी, अथवा ईश्वरः। तत्र नाद्यः, मनुष्ये धर्मादिज्ञानस्य वेदजन्यत्वादेव तत्र तस्य कर्तृत्वानुपपत्तिः। न द्वितीयः तत्रापि योगिनः धर्माधर्मादिप्रमापकं किं बाह्यमिन्द्रियम्? उत आन्तरम् नाद्यः, धर्माधर्मादेः बाह्येन्द्रियायोग्यत्वात्। न द्वितीयः, आत्मयोग्यतद्गुणातिरिक्तज्ञानजनने मनसोऽप्रभविष्णुत्वात्। धर्माधर्मयोश्चात्मगुणत्वेऽप्ययोग्यत्वात्। तस्मादनेककर्तृत्वस्याप्यनुपपत्तिः। नापि ईश्वरः कर्ता, वेदादीश्वरस्य सिद्धिः, ईश्वरश्च वेदानां प्रणेता इत्यन्योन्याश्रयस्य दुरुद्धरत्वात्। तस्मात् कर्त्रस्मरणात् वेदानामपौरुषेयत्वं निराबाधम्। किञ्च अपौरुषेयत्वं नाम पूर्वकालत्वव्यापकसमानानुपूर्वका-ध्ययनविषयत्वे सति सर्वजनसमादरणीयत्वे सति अस्मर्यमाणकर्तुकत्वमिति स्वीकर्तव्यम्। अथवा पुरुषसमवेतमानान्तरजन्य ज्ञानानपेक्षोत्पत्तिकानुपूर्वकत्वे सति अध्ययनविषयत्वम्, अथवा उच्चारणपूर्वकोच्चारणवत्वं अपौरुषेयत्वमिति वक्तव्यम्। तच्च वेदेषु सुतरां घटत इति सिद्धमपौरुषेयत्वम्। किञ्च नित्यत्वं नाम प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम्। इदं वर्णसामान्यस्य, आनुपूर्वीविशिष्टतत्समुदाय-रूपस्य वेदस्य तु नित्यत्वमपौरुषेयत्वेनैव गतार्थमिति वेदस्य नित्यत्वं अपौरुषेयत्वञ्चेति मीमांसाशयः।

- **शबरस्वामिदृष्ट्या वेदस्य अपौरुषेयत्वनिर्णयः**

महर्षिजैमिनिना पूर्वपक्षमुद्धृत्य तदनु चतुर्भिस्सूत्रैस्तत्खण्डनपुरस्सरं स्वसिद्धान्तसम्मतं वेदापौरुषेयत्वमपि प्रतिपादितम्। तत्रादौ- "उक्तं तु शब्दपूर्वत्वम्"। " अस्य सूत्रस्य व्याख्यायां शबरस्वामी बभाण, यदस्माभिः पूर्वमेव पञ्चमसूत्रस्य व्याख्यायामुक्तम्, यद्वेदाध्ययनस्यावच्छिन्ना परम्परा विद्यते," अर्थात् प्रत्येकस्य अध्येतुरध्ययनात् प्रागन्यस्याध्येतुरध्ययनमासीत, एवं प्रकारेण वेदाध्ययनस्याविच्छिन्ना परम्परा विद्यते।

प्राचीनतमस्याध्येतुर्नाम ज्ञायते, किन्तु वेदानां कर्तुर्नाम न ज्ञायते। वेदाध्ययनस्याविच्छिन्नपरम्परया कथं वर्तत इति भट्टपादैः श्लोकवार्तिके निरूपितम्- "बेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।

वेदाध्ययनसामान्यादधुनाध्ययनं यथा॥

तस्म्मान्नित्यो वेदः। इति।

वेदानां नामानि पुरुषनाम्नाऽभिहितानि भवन्ति, तस्मात् पौरुषेयो वेद इति खण्डयन् जैमिनिः प्राह "आख्या प्रवचनात्। अस्य सूत्रस्य व्याख्यायां शबरस्वामिनोच्यते यत् काठकादिसमाख्या वेदस्य कर्त्तारं सूचयति चेत् कर्तुर्विषये एवं प्रकारिकाऽर्थापत्तिर्नोचिता, यतोहि कदाचित् जनाः कर्तुरभावे कर्तुर्भिन्नं जनमधिकृत्य नामकरणं कुर्युः, यदि तेन जनेन तस्य शास्त्रस्यापूर्वाथवाऽसामान्यव्याख्या कृता चेत् काठकादिसमाख्या (नामकरणम्) प्रकृष्टासाधारणव्याख्यामधिकृत्याऽभिहिता, न कर्तारं सूचयति। अत्रापि तथैव कठादिभिः ऋषिभिरप्येवं प्रकारेणोत्कृष्टप्रवचनमथवा व्याख्यानं कृतम्, यथाऽन्ये जनाः कर्तुं न पारयन्ति। अतो वेदसंहितानां नामानि जनाः असाधारणप्रवचन-कर्तृनाधारीकृत्य कुर्वन्ति।

एवं प्रकारेण शबरस्वामी सिद्धं कर्तुं प्रयतते यत् कर्त्तरि सत्येवासाधारणता न द्योत्यते, अपितु प्रवचनकर्तरि सत्यप्यसाधारणता भवितुमर्हति। मूलग्रन्थकार एवासाधारणो न भवति, अपितु ग्रन्थस्य व्याख्याकारोऽपि भवितुं शक्नोति। अतः काठकादिविशेषणानि नानर्थकानि सन्ति।

स्मृतिग्रन्थेषु ज्ञायते वैशम्पायनो यजुर्वेदस्य सर्वासां शाखानामध्येताऽसीत्, परन्तु कठेन तु केवलमेकस्याः काठकशाखाया अध्ययनं प्रवचनञ्च समाचरितम्। अनेकशाखानामध्येतु-वैशम्पायनस्य समक्षे कठः केवलमेकस्या एव शाखाया अध्येता, अन्यशाखानां न सोऽध्येता, अतः स्वविशिष्टशाखायां प्रकृष्टत्वाद् (विशेषज्ञत्वाद्) एतेऽसाधारणकाठकादिविशेषणानि" तस्यै शाखायैरभिहितानि भवन्ति, यस्यां शाखायां तस्य महर्षेर्जनस्य वा प्रकृष्टता विशेषज्ञता वा स्यात्। अतः प्रवचनसमाख्याऽऽधारेणापि काठकादिविशेषणानि भवितुमर्हति। तस्माद्वेदा अपौरुषेयाः।

शास्त्रदीपिकायामपि पूर्वपक्षिणां वेदपौरुषेयत्वसाधकमनुमानवाक्यं खण्डयन् वेदापौरुषेयत्वं साधयन् पार्थसारथिमिश्रः प्राह- "उक्तं तु शब्दपूर्वत्वमाख्याप्रवचनादिति"।

वाक्यत्वात्पौरुषेयत्वं दृश्यादर्शनबाधितम्।

प्रतिज्ञाहेतुर्विरुद्धश्च हेतुस्तस्मादकृत्रिमाः॥[2]

यदि वेदानां कर्त्ता कश्चिदभविष्यत् ततोऽवश्यमध्येतृपरम्परया बुद्ध्यादिवदस्मरिष्यत्। न ह्यस्य स्मरणं सम्भवति। तस्मान्नित्योऽपौरुषेयो वेदः।

अग्रिमसूत्रेण पूर्वपक्षिणाम् 'अनित्यदर्शनाच्च इति सूत्रस्थमतं खण्डयन् जैमिनिः प्राह- "परं तु श्रुतिसामान्यमात्रम्"। अस्यां व्याख्यायां शबरस्वामिनोक्तं यत् प्रावाहणीत्यादिदृष्टान्तैर्वेदानामनित्यत्वं पूर्वपक्षिणा साधितम्, तन्न, यतोहि 'प्रवाहण' इति नामकस्य पुरुषस्यासिद्धत्वात् 'प्रवाहणस्यापत्यं प्रावाहणिः' न भवितुमर्हति, यतोहि 'प्र' इति शब्दः प्रकर्षे सिद्धः, 'वह' इति धातुः प्रापणार्थे प्रसिद्धः। द्वाभ्यां शब्दाभ्यां

[2] शास्त्रदीपिका, वेदापौरुषेयताधिकरणम्

न कश्चित् समुदायः सिद्धः। इकारप्रत्ययो यथा 'अपत्यार्थे' भवति तथैव क्रियास्थितौ 'कर्त्तरि' अपि भवति। अतः 'प्रवाहण' इति शब्दस्यार्थः यः प्रकृष्टरूपेण वस्तुनि वाहयति स प्रावाहणिः। 'बबर' इति शब्दोऽपि प्रवाहितो वायोर्ध्वन्यनुकरणमात्रम्। एवं प्रकारेण एतौ द्वावपि शब्दौ नित्यपदार्थस्य सिद्धपदार्थस्य वा बोधकौ। अतो बबरादिशब्दाः केवलं ध्वनिसामान्यबोधकाः सन्ति, न तु पुरुषसामान्यबोधकाः। तस्मान्नित्योऽपौरुषेयो वेदः।

वेदवाक्येष्वसम्बद्धार्था असङ्गतार्थाश्च दृश्यन्त इति वदतां पूर्वपक्षिणां मतं शवरस्वामिः प्रस्तौति– वेदवाक्यान्युन्मत्तपुरुषाणां बालानां वाक्यानिव सन्ति। यतोहि तत्र पश्यामः 'बनस्पतयः सत्रमासत 'सर्पाः सत्रमासत इति। (वनस्पतिभिः सत्रयागे आसनं गृहीतम्) (सर्वैः सत्रयागे आसनं गृहीतम्) इति। इमानि वाक्यान्युद्धृत्य पूर्वपक्षी वदति यदि इमानि वेदवाक्यानि तथैवासम्बद्धानि सन्ति। यथेदं लौकिकवाक्यं 'जरद्गवो गायति मत्तकानि इति। इमानि वाक्यान्युद्धृत्य पूर्वपक्षी वदति यत् कथं जरद्गवो नाम वृद्धगौः गायेत्? कथं वा वनस्पतयः सर्पा वा सत्रमासीरन् इति?

पूर्वपक्षिणां मतं खण्डयन् जैमिनिः प्राह यद्वेदवाक्यानां कस्माच्चित् कर्मणः सम्बन्धो भवत्येव "कृते बा विनियोगः स्यात् कर्मणः सम्बन्धात्। अस्य सूत्रस्य व्याख्यायां शबरस्वाम्याह– वेदवाक्यानि परस्परं विनियुक्तं हि दृश्यन्ते, यतोहि 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यभिधानं कृत्वा, 'कर्त्तव्यः' इत्युच्यते। 'केन' साधनेन इत्याकाङ्गायां 'सोमेन यजेत' इत्युच्यते। 'किमर्थम्' इत्याकाङ्क्षायां 'स्वर्गाय' इति। 'कथम्' इत्याकाङ्क्षायामित्थमनयेति कर्तव्यमित्युच्यते। एवं प्रकारेण वाक्यार्थमवगच्छन्तः, एभिर्वेदवाक्यैः संस्कृतं पिण्डितं वाक्यार्थ कथमुन्मत्तपुरुषबालवाक्यार्थमिव भवितुमर्हति ?

पुनः पूर्वपक्षिणां वनस्पतयः सत्रमासत' इत्यादिवाक्यानाम् आक्षेपान् खण्डयन् शबरस्वामी प्राह– यदि 'वनस्पतयः सत्रमासत' इत्यादिवाक्यान्यसङ्गतान्यसम्बद्धानि चाभविष्यन् चेद् 'अग्निहोत्रं जुहुयात्स्वर्गकामः इत्यादिवाक्यान्यप्यसङ्गतान्यसम्बद्धानि चाभविष्यन्। अतो नास्ति असङ्गतमसम्बद्धञ्च, यतोहि 'बनस्पत्यः' इत्यादयः सत्रस्य स्तुतयः। "वनस्पतयो नामाचेतना इदं सत्रमुपासितवन्तः किं पुनर्विद्वांसो ब्राह्मणाः"। यथा लोके "सन्ध्यायां मृगा अपि न चरन्ति, किं पुनर्विद्वांसो ब्राह्मणा इति"। अत्र 'कैमुतिकन्यायेन' 'दण्डापूपन्यायेन' वा सत्रस्य स्तुतयः कृताः।

एवं प्रकारेण वेदस्योपदेशोऽनिन्दनीयः, मित्रमिव परामर्शतुल्यसुखदो निश्चितश्च, एवं स्थितावस्य उन्मत्तबालवाक्यसदृशोऽसम्बद्धोऽसङ्गतश्च सन्तीत्याशङ्का कथं कर्तुं शक्यते? एवं प्रकारेण चोदनया (क्रियाप्रवर्त्तकवेदवाक्यैः) लक्षितः पार्थो धर्म इति सिद्धम्। यथोक्तं पार्थसारथिमिश्रेण–

तस्मादपौरुषेयत्वाञ्चोदनानां प्रमाणता।
चोदनेति प्रतिज्ञार्थः पादेनानेन साधिनः॥[3]

वेदानां पौरुषेयत्वापौरुषेयत्वे नैयायिका वेदानां पौरुषेयत्वं स्वीकुर्वन्त्यथ पुरुषनिर्मिताः सन्ति, एतेषां मते वेदाः पौरुषेया ईश्वरकृताश्च। सृष्ट्यारम्भे ईश्वरः करुणावशाज्जीवानां कल्याणाय वेदानां ज्ञानं ददाति।

[3] शास्त्रदीपिका, वेदापौरुषेयताधिकरणम्

अन्यच्च मतं मीमांसकानां वर्तते, ये वेदानामपौरुषेयत्वं स्वीकुर्वन्ति, अर्थात् वेदाः पुरुषनिर्मिता न सन्ति, अपितु एते नित्यानाद्यनन्ताश्च सन्ति। एतेषां कोऽपि रचयिता नास्ति। जैमिनिप्रणीतमीमांसासूत्राणां भाष्यकारः शबरस्वामिनापीदं विषयं शाबरभाष्ये सम्यक्तया प्रतिपादितम्। शास्त्रदीपिकायां पार्थसारथिमिश्रेण सर्वदर्शनसङ्ग्रहे माधवाचार्येण च वेदापौरुषेयत्वविमर्शः क्रियते।

**वेदापौरुषेयत्वकारणानि-**

१. वेदाध्ययनस्याऽविच्छिन्ना परम्परा विद्यते, प्राचीनतमस्याध्येतुर्नाम ज्ञायते, किन्तु वेदानां कर्तुर्नाम न ज्ञायते। यथोक्तं कुमारिलभट्टेन-

बेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा॥

२. यदि वेदानां कर्त्ता कश्चिदभविष्यत् ततोऽवश्यमध्येतृपरम्परया बुद्ध्यादिवदस्मरिष्यत्। न ह्यस्य स्मरणं सम्भवति। तस्मान्नित्योऽपौरुषेयो वेदः।

३. वेदकर्त्ता ईश्वरोऽस्ति, इदमपि न स्वीकरोति। यतो हीश्वरस्यास्तित्वमपि नास्तीति स्वीक्रियते।

४. काठकादिवेदसंहितानां नामानि वेदस्य प्रवचनादभिहितानि, न तु रचनत्वात्। यतो हि वेदानां न कोऽपि कर्त्ता वर्तते। यथोक्तम्- "यद्वा नायं पुरुषविशेषवचनः कठशब्दः, किन्तु नित्यस्य चरणविशेषस्यैवेयं सञ्ज्ञा, तच्चरणैः पुरुषैः परम्परयाधीयमाना शाखा, काठकशब्देनाभिधीयते"।

५. वेदेषु पुरुषाणामितिहासो न वर्तत अतोऽपौरुषेयो वेदः इति सिद्धान्तः।

➢ **वेद-पुरुषयोः सम्बन्धः**

द्रव्यप्रतिपादने संकेतद्वारा शब्दस्य पदार्थस्य च त्रिविधः सम्बन्धः भवति, वाक्यार्थप्रतिपादनेने रचनया च पुरुषस्य च त्रिविधः सम्बन्धः भवति। शब्दार्थसम्बन्धः नित्यः इति कल्पयित्वा वेदेषु पुरुषप्रवेशः खण्डितः। अर्थात् वेदाः पुरुषेण प्रस्ताविताः इति वक्तुं कारणं यत् अस्माभिः कदापि पुरुषं विना वाक्यानि न श्रुतानि, न पठितानि, न ज्ञातानि वा। यत्र मिमांसकानां मतानुसारं शब्दस्य वाक्यार्थस्य च सम्बन्धः नित्यः। अतः श्लोकोऽयम् अर्थं बोधयति' अर्थात् अस्माभिः न ज्ञायते चेदपि श्लोकः स्वविषयं बोधयति। शक्तिग्रहाभावेऽपि शब्दस्य प्रतिपादनशक्तिः अस्ति इत्यर्थः। वाक्यार्थसम्बन्धेन पुरुषार्थसम्बन्धं पृथक् कर्तुं वाक्याधिकरणस्य प्रवृत्तिः अस्ति। अस्मिन् अधिकरणे यथा शब्दस्य द्रव्ये शक्तिः किञ्च वाक्यार्थे शक्तिःएतस्य प्रतिपादनस्य आवश्यकता नास्ति, यतः शब्दे एव वर्तमानः पदार्थः आकांक्षाविच्छिन्नः, सामर्थ्यं आसक्तिश्च विशिष्टभावरूपेण वाक्यस्य अर्थं निर्माति। व्याकरणानुसारं वाक्यस्य अर्थः वाक्यस्य सामर्थ्येन व्यज्यते। शब्दबोध पदार्थानां परस्परसम्बन्धः संसर्गेन भासते। एतत् नैयायिकानां मतं यत् वाक्यस्य अर्थे पृथक् शक्तिः इति आभासं ददाति, परन्तु कुमारिलभट्टः अभिहितान्वयस्य समर्थनं कृतवान् अस्ति। प्रभाकरः अन्विताभिधानस्य समर्थनं कृतवान् अस्ति। एवं वाक्यार्थे द्वितीयरूपेण पुरुषसम्बन्धः निरस्तः अभवत्। तृतीयः प्रकारः पुस्तकया रचनया भवति।

सन्दर्भवाक्यस्य व्यक्तिना सह द्विविधः सम्बन्धः भवति, एकः विषय-कर्म-भावना-सम्बन्धेन द्वितीयः प्रयुक्त-प्रवचन-भावना-सम्बन्धेन इति। प्रवचनं सामान्यं रचना च असाधारणम्। असाधारणं
विशेषणम्। अतः वेदः पौरुषेयः।

केषाञ्चन आचार्याणां मते वेदेषु मनुष्य-देश-नदी-वृक्षादीनां विषये निर्देशकारणात् वेदाः
पुरुषप्रनीतः पौरुषेयः वा इति उच्यन्ते, परन्तु मीमांसादर्शनानुसारं प्रवचनम् अपि असाधारणं मन्यते। यथा "कठसंहिता" अथवा "कठब्राह्मण" विषये एका आख्यायिका अस्ति यत् महर्षिः "कष्टं" इत्यनेन अनेकशाखानां तस्य सम्पूर्णतया अध्ययनं कृतम् आसीत्। द्वितीयं कारणं यत् वेदेषु मनुष्याः, नद्यः इत्यादीनां नामानि दृश्यन्ते, एतेन अपि वेदानां पौरुषेयं सिद्धं भवति। परन्तु एषा कल्पना चतुरबुद्धिभ्यः न विधीयते; यतो हि अधिकतया लौकिकवस्तूनां नामानि प्रथमं वेदात् आगतानि। तद्दृष्ट्या लोकनां परम्परा निरन्तरं प्रचलति। अर्थात् वेदः इतिहासं शाश्वतं न मन्यते, अपितु इतिहासस्य शाश्वतां प्रस्तावयति, तस्य विस्तृतं व्याख्यानं मीमांसायाः "शाबरभाष्यम्" इत्यत्र द्रष्टुं शक्यते। प्राचीनकाले ब्रह्मर्षयः समाधिषु नित्यं विषयं वाक्यं वा शब्दं वा पश्यन्ति, अतः वेदेषु भूतपूर्वस्य पुरुषकर्तृत्वस्य कल्पनायाः लेशोऽपि न विद्यते अनन्यपुरुषकर्तृत्वात् लौकिकसृष्टयः पौरुषेयः इत्यादयः, यथा महाभारतम् रामायणम् इत्यादिः।

❖ **ग्रन्थः/ग्रन्थकर्ता/सम्पादकः/व्याख्याकारः/प्रकाशनसंस्था/वर्षः-**


- <u>अर्थसङ्ग्रहः</u>- लौगाक्षिभास्करः, चौखम्बासुरभारतीप्रकाशन्।
- <u>मीमांसापरिभाषा</u> (परिष्कृतः-अक्षरार्थव्याख्या) डि.टि.ताताचार्यशिरोमणिः, डि.टि.स्वामिप्रकाशनम् तिरुपतिः, 2000।
- <u>अर्थविवृतिः</u>- डा.श्रीराम्.ए.एस्, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः, 2017।
- <u>शास्त्रदीपिका</u>- धर्मदत्तसूरी,